International Journal of Sanskrit Research 2017; 3(2): 143-144

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(2): 143-144
© 2017 IJSR
www.anantaajournal.com
Received: 20-01-2017
Accepted: 21-02-2017

**शैलेन्द्र वर्मा**
महर्षि पाणिनि सं. एवं वै.वि.वि.

**Correspondence**
**शैलेन्द्र वर्मा**
महर्षि पाणिनि सं. एवं वै.वि.वि.

# कालिदासस्याष्टमूर्त्तेः ऋतुत्वम

## शैलेन्द्र वर्मा

वेदान्तेषु यमाहुरेकपुरूषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अप्तर्यश्च मुमुक्षुभिर्नियमित प्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।।

संस्कृतसाहित्यस्यानन्तव्योम्नि कविकुलगुरूरित्युपाधिना विभूषितस्य महाकवेः कालिदासस्योत्कृष्टकाव्य संसारे सृष्टः प्रत्येकस्यापि पदार्थस्य मानवोचितं वर्ण दृश्यते। तत्र च महाकविः कालिदासः प्रकृतेः साधककविः सन् प्रकृतिवर्णने ऋतूनामद्भुतस्वरूपं वर्णयामास। कालिदाससाहित्यस्यालोऽनेनेदं स्पुटं प्रतीयते यत् गिरीणां नदीनामरण्यानामारण्यकानां पादपगुमलतानां लोलानां वन्यप्राणिनां ऋतूणाञ्च यथाऽद्वितीयाप्रतिमञ्च स्वरूपं कालिदासेन वर्णितं न तथाऽन्येन कविना।
अभिज्ञानशाकुन्तलस्य मङ्गलशासने कविरयं अष्टमूर्तीनां वर्णनेन स्वस्य ऋतूनां वर्णनपरकबुद्धेः परिचयं प्रायच्छत्। तत्र च स्त्रष्टुराद्यासृष्टिर्जलमयी तया सृष्टिरारभ्यते। इत्यनेन वर्षा ऋतोः सङ्केतः। तेनैव पर्जन्यः। पर्जन्येनाभं जायते तेन हि भूतानि जायन्ते। यथा च मनुस्मृतौसोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्।। [1]

एवग्चाम्रे वहिन्मयी मूर्तिरित्यनेन ग्रीष्मर्तोः स्पष्टं स्वरूपं वर्णयामासेऽति दृश्यते। तत्राऽपि मनुना कथितम् –

अग्नौ प्रस्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जयाते वृष्टिर्वष्टेरन्नं ततः प्रजाः।। [2]

इत्येवं हि ऋग्वेदे दृश्यते। तत्र च –
उदीरयथा मरूतः समुद्रतो वृष्टिर्वर्षयथापुरीषिणः तथा च तैत्तिरीयोपनिषदि –

अग्निर्वा इतो वृष्टिम् उदीरयति मरूतः सृष्टां नयन्ति।
समुद्रात् वायुसंयोगात् वहन्ति आपो गभस्तयः ।। [3]

इत्यनया रीत्या कालिदासस्य वहिन्मयी मूर्तिः ग्रीष्मऋतुरेव नान्यदिति।
एवं हि होत्री हवनकर्त्री यजमानरूपामूर्त्तिरपि ग्रीष्मतौ मेघानां निर्माणप्रक्रियायाः वर्णनं विद्यते। तच्च यजुर्वेदे –

समुद्रादूर्मिर्मधुमान् उदारदुपा शुना सममृतत्वमानट्।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः।।

ग्रीष्मर्तौ उष्णतापशात् जले वाष्पं जायते। तेन वाष्पप्रभावेण समुद्रजयस्यवाष्पं मेघरूपेण परिवर्त्यते। पुनः सूर्यवायुसंयोगात् सूक्ष्मरूपं संगृह्य वृष्टिं करोतीति यजमानरूपा मूर्तिः कालिदासस्य। तच्च शतपथब्राह्मणेऽपि सूर्यस्य हवाऽवक्रो रश्मिर्वृष्टिव निर्नाम

---

[1] म. स्मृ. 1/18
[2] म. स्मृ. 3/76
[3] ऋ.वे. 5/55/5

येनेमाः सर्वाः प्रजा विभर्ति।

इत्यनन्तरं ये द्वे कालं विधत्तः इत्यनेन कालिदासः कालनियामकयोः ऋतुप्रवर्तकयोः सूर्याचन्द्रमसोः वर्णनमकारि। तैत्तिरीयेब्राह्मं – ''अग्निऋतुः सूर्यः ऋतुश्चन्द्रमा ऋतुः''
इत्यत्र वसन्तग्रीष्मौ आग्नेयौ वर्षाशरदौ सौरौ हेमन्तशिशिरौ चान्द्रावित्याशयो दृश्यते। तदेव कालिदासस्य अग्नि–सूर्य–चन्द्रमयीमूर्तौ दृश्यते। अग्निसूर्यचन्द्राणां षड्तूणामाधिपत्ये सति द्वादशमासानां संज्ञाः तथैव विहिताः वेदे। यथा –

अरूणोऽरूणरजाः पुण्डरीको विश्वजिदभिजित् ।
आर्दः पिन्नमानोऽन्नवान् रसवानिरावान् ।
सर्वौषधः सम्भरो महस्वान् ।।

अत्र महस्वानित्यनेऽनाधिमासः। अन्ये तु द्वादशमासाः। कालिदाससाहित्ये ऋतुणां विषये वसन्तो विशिष्यते। वसन्तग्रीष्मेअग्निऋतू। वसन्तस्य विषये कथ्यते तैत्तिरीयब्राह्मं ''मुखं वा एवद्वतूनां यद्वसन्तः'' इत्यनेन ऋतुपात्रस्य मुखे वसन्तः। तत्रैव संवत्सरो पक्षिरूपे वर्णितः। उक्तञ्च –
वसन्तो हि शिरो ग्रीष्मो दक्षिणपक्षः शरदुत्तरपक्षः वर्षा पुच्छं हेमन्तो मध्यमिति।
महाकविरयं षष्ठमूर्तेः वर्णनमाकाशरूपेण अकरोत्। श्रुतिविषयगुणा या स्थिता व्याप्य विश्वमित्यनेन नैयायिकानामभिमते सिद्धान्तमुक्तावल्याम् –
आकाशस्य च विज्ञेयः शब्दो वैशेषिको गुणः। तथा च श्रोत्रेन्द्रियग्राह्यो गुणः शब्द इति तर्क संग्रहे अन्नम्भट्टः।
तच्च ऋतूणां पक्षे आकाशमधिकृत्योच्यते यत् सूर्याचन्द्रमसौ नक्षत्राणि तारकाः ऋतून् मासान् दिवसांश्चाकाश एव वहति। अतः श्रुतौ कथ्यते यद्यः स आकाशः स आदित्य एव। एतस्मिन्नुदिते सर्वमिदमाकाशते। इन्द्र एव स इति। तेन हि आकाशते द्योतते इत्याकाशः। तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता। दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि। यथा –

नमोऽस्तु रूद्रेभ्यो ये दिवि मेषां वर्षमिषवः।
नमोऽस्तु रूद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः।
ऐतरेय ब्राह्मणे –
द्यौरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम्।

एवं हि पृथिव्याः विषये सर्वबीजप्रकृतिरित्यनेन ऋतूणां प्रभावात्परं फलप्राप्तिरूपा पृथिवी विद्यते। तया अनुभाव्यते ऋतूणां सौन्दर्यम्। तस्याभिज्ञानं कालिदासेन आकाशत्परं कृतम्। वेदेऽपि तथैव विद्यते – यदा वै द्यावा पृथिवी संज्ञानाथेऽथ वर्षति।
प्राणोदानौ वै द्यावापृथिवी।
एवं हि प्राणिनः प्राणवन्तः इत्यनेन वायोः वर्णनं कृतम्। तेन कालिदासस्याभिमतं विद्यते यत् सर्वप्रकृतिऋतूनां संयोजनं सञ्चालनं च वायुना क्रियते। वायुपुराणेऽपि ऋतूणां कारकः वायुरेव। यथा –

आदित्यपित्तं सूर्याग्ने सोमं संक्रमते जलम्
नाडीभिर्वायुर्युक्ता भिर्लोकानां च प्रवर्तते।
यत्र सोमात् सर्वते सूर्य तदभ्रेष्वेव तिष्ठति।
मेघवायुनिघातेन विसृजन्ति जलं भुवि।

वस्तुतः वायुर्नाम ऋतुरेव। धूमज्योतिः सलिल मरूतामितिरीत्या कालिदासः वायोः वर्णभेदेन ऋतूणामभिज्ञानमेव कारयति।
अन्यच्च तस्य श्रृङ्गारहेतवः बहुधा वर्षिता अत्र च विशेषेणाष्टमूर्त्तीणां वर्णने दत्तदृष्टिरहं तस्य ज्योतिषपरकज्ञानं वेदविहितवर्णनासुरारं कर्तुं प्रेरितः।
वस्तुतः कालिदासः स्वकीयेषु सर्वेषु काव्येषु यत्र–यत्र प्राकृतिकसौन्दर्यस्य वर्णनं करोति तत्र–तत्र सः ऋतुचक्रस्याभिज्ञानेन कथयति। प्रायः अवन्तिकावासि कालिदासः ऋतुवर्णने विशिष्यते। यतो हि भौगालिकदृष्ट्या षष्णामपि ऋतूणामवस्थितिः अत्रैव सम्भवति नान्यत्र।
विशेषेण कालिदासस्याभिज्ञनशाकुन्तलस्य मङ्गलशासं मूलतः ऋतुपरकमेव। नान्यदिति।